Shodhshauryam, International Scientific Refereed Research Journal
© 2023 SHISRRJ | Volume 6 | Issue 2 | ISSN : 2581- 6306

# अनुसूचितजाति-जनजातिच्छात्राणां शैक्षिकसामाजिकविकासे पर्यावरणस्य महत्त्वम्

**प्रमोद कुमार दास**
शोधच्छात्रः, शिक्षाविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**Article Info**

**Publication Issue :**
March-April-2023
Volume 6, Issue 2
**Page Number :** 95-98
**Article History**
Received : 07 March 2023
Published : 15 April 2023

**शोधसारांशः-** पर्यावरणशिक्षायाः अवसरः अतीव वर्तते। तदर्थं छात्राणां पाठ्यक्रमे परिसरशिक्षायाः अवसरः कल्पनीयः भवतीति। विद्यालये दृश्यश्रव्योपकरणानां द्वारा अपि प्रत्यक्षरूपेण पर्यावरणविज्ञानस्य महत्त्वं ज्ञापयितं शक्यते। सङ्ग्रहालयेनापि पर्यावरणशिक्षायाः प्रदानं ज्ञानार्जनं च कर्तुं शक्यते। एवं परिसरशिक्षायाः उपरि विशेषव्याख्यानमालायाः अवसरः कल्पनीयः भवति। एवं सम्पूर्णोचितपर्यवारणसंरक्षणेन अस्माकं जीवनं सफलं भवति।

**मुख्यशब्दाः-** अवसरः, अनुसूचितजातिछात्राः, जनजातिच्छात्राः, शैक्षिकः, सामाजिकविकासः, पर्यावरणः।

**भूमिका** भारतीयसंस्कृतौ प्रकृतेः महात्त्वपूर्णस्थानमस्ति। प्रकृतिः आदरणीया पूजनीया च भवति। भारतीयाः प्रतिनित्यं प्रकृतिं पूजयन्ति। वयं मानवाः प्रकृतेः सन्ततिरिति जानीमः। विचारणे ज्ञानं भवति यत् पर्वतः नदी तटाकः शस्यश्यामलभूमिः सुवासितवायुः परिशुद्धजलम् अपेक्षितसौन्दर्यात्मकजीवनं च प्रकृतेः वरमिति। प्रकृतिः अस्माकं माता भवति। मातृवत् अस्मान् रक्षति पालयति च। प्रकृतिः परिस्थित्यनुसारं मातृवत् अध्यापकवत् च मार्गप्रदर्शनं करोति।

सामान्यतः एवम् अभिप्रायः अस्ति गङ्गा पापविनाशिनी भवति इति। गङ्गायाः जलं पवित्रं भवति। यावत् पर्यन्तं गङ्गानद्याः जलप्रवाहः भवति तावत् पर्यन्तम् अस्माकं संस्कृतिः सभ्यता च पुष्पितातथा पल्लविता भवति। किन्तु तस्याः नद्याः जलं दूषितम् अभवत्। तथा मानवानां जीवने उपभोग्यं न भवति। अस्माकं सामाजिकविकासस्य मानदण्डः औद्योगिकीकरणम् अभवत्। औद्योगिकीकरणस्य द्वितीयं नामधेयं भवति वातावरणकालुष्यमिति। दूषितपदार्थैः, कलुषितजले, औद्योगिकविषपूरितवस्तुभिश्च वातावरणं विषपूरितं जायमानम् अस्ति। तथा पर्यावरणमपि अस्माकं सम्पूर्णजीवनविकासे प्रतिबन्धकम् अभवत्। न केवलं जलसम्पत्, किन्त वनसम्पदपि कालुष्यं प्राप्नोति। यतः वनसंरक्षकाः एव वनभक्षकाः जाताः। न केवलं वनसम्पदः विषये किन्त वन्यमृगसंरक्षणस्थानेऽपि वन्यपशूनां घातकाः भक्षकाश्च जाताः। एतादृशव्यवहारेण पर्यावरणं दूषितम् अभवत्। ततः पर्यावरणे समतुल्यता नास्ति। एवम् अस्माकं जीवने परिशुद्धजलं स्वच्छवायुः च न मिलति। स्वास्थ्यमिति समीचीनं नास्ति। तेन जीवनं सम्पूर्णं न भवति।

**पर्यावरणशिक्षायाः अर्थः-** पर्यावरणशिक्षा पर्यावरणमाध्यमेन, पर्यावरणविषये पर्यवारणसंक्षणाय भवति। पर्यावरणं चेतनाचेतनयोः शिक्षाप्रदायिन भवति। यथानुकूलं पर्यावरणस्य उचितप्रकारेण अन्नुपयोगेण समाजहितं न भवति। पर्यावरणं मानवानां कार्यक्रमे यथानुकूलं प्रभावोत्पादकप्रोत्साहनं करोति। पर्यावरणम् अस्माकं सन्तोषजनक–आह्लादकरजीवनसम्पादने

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

संरक्षणे महान् आदर्शः पूर्णशिक्षकः भवति। शिक्षकस्य कार्यं भवति यत् छात्रेषु यथातेषां मूलप्रवृत्तीनां संशोधनेन जीवनसाफल्यं भवति तथापर्यावरणमहत्त्वं ज्ञापनीयम्।

प्रत्यक्षतया पर्यावरणमाध्यमेन पर्यावरणशिक्षायाः विकासः भवति चेत् मानवानां कृते अधिकाधिकलाबः भवति। यथा बालकः पशुपक्ष्यादीन् तथा सुन्दरकृतीन् दृष्ट्वा आकर्षितो भवति तथा तादृशानां विषयाणां ज्ञापनं भवेत्। वातावरणमाध्यमेन शिक्षायाः विकासः भवेत्। शिक्षायाः महत्त्वपूर्णः उपयोगः यथा भवति तथा शिक्षाप्रदानं भवेत्।

मानवाः तेषां जीवनसम्पादनाय सरक्षणाय एवम् अभिवृत्यर्थं प्रतिदिनं पर्यावरणसाहाय्येन कार्यं सुसम्पन्नं कुर्वन्ति। परिवारे तस्य जन्म भवति तत्रैव तस्य पालनं पोषणं भवति। परिवारः तस्य प्राथमिकसमूहः भवति। यदा सः शैशवावस्थां प्रपूर्य कौमारवस्थां प्रति आगच्छति तदा सः सामाजिकसमुदाये आगच्छति एवं सम्पर्कं प्राप्नोति। सः तत्र क्रियाकलेषु भागं गृह्णाति। एवं प्रकारेण वातावरणविषये तस्य प्रवेशः तथा ज्ञानं भवति। जान् ड्यूवी महाशयस्य कथनमस्ति यत् समस्तशिक्षायाः वैय्यक्तिकप्रभावेन सामाजिकचेतनायां भागग्रहणे प्रारम्भः भवति। (All education proceeds by the participation of the individual in the social consciousness of the race - John Dewey)

मानवाः प्राकृतिकपर्यावरणेन जानन्ति यत् मानवखाद्यसामग्री कुतः तदा केन प्रकारेण प्राप्ता भवतीति तथा इयं सामग्री यस्मिन् प्रदेशे उत्पन्ना भवतीति। एवं तेषां स्वास्थ्यार्थं प्राकृतिकपर्यावरणस्यावश्यकता वर्तते। एवं प्राकृतिकसौन्दर्यं रमणीयात्मकं भवति। पर्यावरणेन यत् वयं जानीमः तदेव पर्यावरणशिक्षा भवति।

❖ **पर्यावरणशिक्षायाः उद्देश्यानि**

- **पर्यावरणशिक्षायाः सामान्योद्देश्यानि**

पर्यावरणशिक्षायाः सामान्योद्देश्यानि निम्नलिखितानि भवन्ति। यथा -

1. प्रकृतेः संरक्षणम्।
2. कालुष्यनिवारणम्।
3. स्वास्थ्यसंरक्षणम्।
4. वनसम्पत्संरक्षणम्।
5. वन्यमृगसंरक्षणम्।
6. प्रकृतेः सौन्दर्यसंरक्षणम्।
7. दूषितवातावरणनिवारणम्।
8. उद्यानवनसंरक्षणम्।
9. स्वस्थसुखमयजीवनयापनम्।

- **पर्यावरणशिक्षायाः ज्ञानात्मकोद्देश्यानि**

1. तात्कालिकपर्यावरणस्य ज्ञानप्राप्यर्थं सहायताप्रदानम्।
2. दूरस्थपर्यवारणस्य ज्ञानप्राप्यर्थं सहायताप्रदानम्।
3. चेतनायाः अचेतनायाः च अवगाहने सहायताप्रदानम्।
4. जीवनस्य अन्योन्याश्रितातायाः अवबोधने सहयोगप्रदानम्।

5. भविष्यप्रपञ् अनियन्त्रितजनसंख्याभिवृद्धेः नियन्त्रणकार्यक्रमस्य सम्पादनम्।
6. जनसंख्याभिवृद्धेः प्रवृत्तीनां ज्ञापनम्।
7. भौतिक-मानवीयसंसाधनानां मूल्याङ्कनम् उपचारात्मकसंस्कारप्रदानं च।
8. सामाजिकप्रदूषणानां दूरीकरणाय उपयुक्तोपायानां प्रसारः।

- **पर्यावरणशिक्षायाः भावात्मकोद्देश्यानि**

1. समीपदूरस्थपर्यावरणे निहितवनस्पति-जीवजन्तूनां विषये रुचिप्रदर्शने सहायताप्रदानम्।
2. प्रकृतेः प्रशंसनम्।
3. विभिन्नजातीनां, प्रजातीनां, धर्माणां संस्कृतीनां च विषये सहनप्रदर्शनम्।
4. समानतायाः, स्वतन्त्रतायाः, तथा न्यायस्य महत्त्वप्रदानम्।

- **पर्यावरणशिक्षायाः क्रार्यात्मकोद्देश्यानि**

1. पर्यावरणशिक्षाद्वारा भ्रमण-यात्रेत्यादिकार्याक्रमाणां माध्यमेन क्रियात्मकोद्देश्यानी पूर्तिः कर्तुं शक्यते।

एवं वयं सर्वे जानीम- यत् मानवानाम् अस्तित्वसम्पादनाय एवं भौतिक-सामाजिक-मानसिकेत्यादिविकासाय यानि तत्त्वानि आवश्यकानि भवन्ति तानि प्रकृत्यां सन्ति। परन्तु प्रकृतेः सन्तुलितमहत्त्वपूर्णतत्त्वानां द्वारा व मानवविकासः भवति। तदर्थं सन्तुलितपर्यावरणपरिरक्षणम् अस्माकं कर्तव्यं भवति। सन्दर्भेऽस्मिन् डा. विद्यानिवासमिश्र महाशयस्य उचितं कथनम् अस्ति यत् प्रकतेः संरक्षणम् अस्माकं सर्वेषां महत्त्वपूर्णं कर्तव्यं भवतीति। येन अस्माकं जीवनं स्वास्थ्यपूर्णं सुखप्रदम् आनन्दमयं मनोलञ्जकं च भवति।

**पर्यावरणशिक्षायाः महत्त्वम् -** अस्मिन् भूमण्डले पर्यावरणप्रभावेनैव मानवानां जीवनस्य सर्वतोमुखविकासः भवति। यथा शारीरक-मानसिक-सांस्कृतिक-सामाजिक-बौद्धिक-रचनात्मक-सर्जनात्मक-सौन्दर्यात्मक-कलात्मकादिविकासाः भवन्ति। यथा विकासः तथैव उद्देश्यस्य साफल्यं भवति। उद्देश्यस्य सफलतायै सुशिक्षितबालकानां निर्माणम् आवश्यकं भवति। एते भाविनागरिकाः, भाविसंरक्षकाः नवसमाजनिर्मातारः भवन्ति। तादृशबालकानां कृते परिशुभ्रक्षेत्रे विद्यालयस्य भवननिर्माणम् अपेक्षितं भवति। यत्र शुद्धजलं, स्वच्छवायुः, प्रकाशः, आह्लादजनकपरिमलभरितपरिसरः भवति तत्र विद्यालयस् भवननिर्माणम् आवश्यकं वर्तते। तेन बालकाः आकृष्टाः भवन्ति। यतः तेषां प्रभावोत्पादकोचितव्यवहारणैव राष्ट्रस्य उन्नतिः समृद्धिः च भवति। स्वस्थे शरीरे स्वस्थ्यं मनः इति वचनानुसारेण मनोनिर्मलपरिपूर्णस्वस्थबालकानां निर्माणार्थं परिशुभ्रपर्यावरणं, तदनुकूलवातावरणं चापेक्षितं वर्तते। तादृशबालकानां कृते पर्यावरणशिक्षायाः शिक्षणावसरः वर्तते। एवं वयं जानीमः यत् विद्यालये तादृशव्यवस्था परिकल्पनीया इति।

पर्यावरणं नाम परितः विद्यमानः प्रदेशः प्रान्तं वेति वक्तुं शक्यते। यदा पर्यावरणं परिशुभ्रं शुद्धवायुसहितं कालुष्यरहितं भवति तदा अस्माकं मनः अपि निष्कल्मषं निर्मलम् आह्लादजनकं मनोरञ्जकं च भवति। यत्र मनः निर्मलम्, आनन्दजनकं, मनोरञ्जकम्, आह्लादकरं, विनोदात्मकं, सुन्दरं, शोभनं भवति। तत्रैव मानवानां जीवनं सफलं मोदप्रमोदानन्दमयं भवति। यः आनन्दमयः भवति स एव मानवः समाजहिताय, मावकल्याणाय, परोकाराय सर्वोत्तमरूपेण सेवां करोति। तादृशपरिसरे एव शारीरिक-मानसिक-बौद्धिक-नैतिक-विकासाः सन्ति। अतः विद्यालये यथा समाजे पर्यावरणशिक्षायाः व्यवस्था सम्पादनीया भवति।

**उपसंहार**:- एवमुपर्युक्तप्रकारेण अस्माभिः ज्ञायते यत् पर्यावरणशिक्षायाः अवसरः अतीव वर्तते। तदर्थं छात्राणां पाठ्यक्रमे परिसरशिक्षायाः अवसरः कल्पनीयः भवतीति। विद्यालये दृश्यश्रव्योपकरणानां द्वारा अपि प्रत्यक्षरूपेण पर्यावरणविज्ञानस्य महत्त्वं ज्ञापयितं शक्यते। सङ्ग्रहालयेनापि पर्यावरणशिक्षायाः प्रदानं ज्ञानार्जनं च कर्तुं शक्यते। एवं परिसरशिक्षायाः उपरि विशेषव्याख्यानमालायाः अवसरः कल्पनीयः भवति। एवं सम्पूर्णोचितपर्यवारणसंरक्षणेन अस्माकं जीवनं सफलं भवति।

**सहायकग्रन्थसूची**


1. शर्मा, डा0 आर्. ए., Environmental Education, सूर्या पब्लिकेशन्, 2006.
2. ए.पि., एम्. आर्., Environmental Science Education, स्टार्लिं पब्लिकेशन् प्राइभेट् लिमिटेड्, न्यू दिल्ली,1996.
3. सिं, डा0 रामपालः, Environmental Psychology, विनोद पुस्तक् मन्दिर्, आगरा, 2002.
4. वाना, डा0 राजीवः, Environment Education, रिसर्च् पब्लिकेशन्, न्यू दिल्ली, 1999
5. ईंगिल्सन्, डि. सि.; इयोकार्स् डि. एइच्, A Guide to Curriculum Planning in Environmental Education, मिल्वौकी, 1994.
6. सिंह, एस्., Environmental Geography, प्रयाग पुस्तक् भवन्, इलाहावाद्, 1995.
7. कुमारः, भि.के., A Study in Environmental Pollution, तारा बुक् एजेन्सी, वाराणसी, 1982.